C. S. (Main) Exam : 2012

Sl. No.

**E-DTN-M-JMD-17**

# SANSKRIT

## (Compulsory)

| *Time Allowed : Three Hours* | *Maximum Marks : 300* |
|---|---|

## INSTRUCTIONS

*Candidates should attempt ALL questions.*
*The number of marks carried by each question is indicated at the end of the question.*
*Answers must be written in* ***Sanskrit*** *(Devanagari Script) unless otherwise directed.*
*Prescribed word limit must be followed for Question No. 3. The precis must be attempted* ***only*** *on the special precis sheets separately provided.*
*These precis sheets are to be securely attached to the answer book.*
***Important : Whenever a Question is being attempted, all its parts/sub-parts must be attempted contiguously. This means that before moving on to the next Question to be attempted, candidates must finish attempting all parts/sub-parts of the previous Question attempted. This is to be strictly followed.***
*Pages left blank in the answer-book are to be clearly struck out in ink. Any answers that follow pages left blank may not be given credit.*

(Contd.)

**1.** अधस्तनानामेकमधिकृत्यानुमानतः त्रीणि शतानि शब्दानवलम्ब्य **एको** निबन्धो लेखनीयः । 100

(i) भारतम् : व्यापारिकविकासस्यैकं प्रवर्धमानं क्षेत्रम् ।

(ii) अस्माकं महानगराणि महिलाभ्यः कियत्सुरक्षितानि ?

(iii) वनजीवानां संरक्षणम्प्रबन्धनञ्च ।

(iv) भारते व्यावसायिकी शिक्षा ।

(v) चलचित्राणां काल्पनिकः संसारः ।

**2.** निम्नलिखितं गद्यांशं सावधानतया पठत, गद्यांशस्यान्ते च पृष्टानां प्रश्नानां स्पष्टतया सम्यक् संक्षिप्तभाषायाञ्चोत्तराणि प्रदेयानि । 6×10=60

पाठकानामधिकसंख्या क्षणिकमनोरञ्जनाय पठति, अथवा तद्विश्रान्तये यां ते पुस्तकेन प्राप्नुवन्ति। अपरशब्देषु ते सामान्यतया कालयापनाय पुस्तकानि पठन्ति । समयः यथा बहुधा मूल्याङ्कनं क्रियते एको विरलः महार्घो निधिः । इमं महार्घन्निधिं पाठकाः व्यर्थमेव नाशयन्ति। अविश्वसनीयमिव प्रतिभाति यत्कालः पाठकानामुपरि भाररूपेण वर्तते; अनन्तरञ्च तेऽवगच्छन्ति यत्कालस्यातिरिक्तभारान्मुक्तिः, यान्ते वाञ्छन्ति, पुस्तकैरेवाप्तुं शक्यते । एतावत्तु पर्याप्तं स्पष्टं यत्ते नान्यस्माद् हेतोः पठन्ति । यदि ते एतादृशं कुर्युस्तदा तेन पठनेन ते स्वेभ्यः किमप्यवाप्तुं शक्नुवन्ति, परन्नैतादृशाः संकेताः यत्पठनस्यान्यत् किमपि प्रयोजनं स्यात् । पठनेन तेषामुपरि केचन प्रभावा अवश्यमेव स्युः परं तैः प्रभावैः ते अनभिज्ञाः । प्रभावाः लाभप्रदा भवितुं पार्यन्ते, निर्णायका भवितुं शक्यन्ते – नैतन्निष्कर्षं वयं ज्ञातुं शक्नुमः । एतदेवास्य प्रमाणं यत्पठनेन ते न किमपि स्वेन सह एतादृशं वस्तु नयन्ति यदनन्तरं ते वक्तुं समर्थाः स्युस्तेषामध्ययनविषये ।

(i) जनैः पुस्तकपठन-कारणविषये लेखकः किं कथयति ? जनानामधिकांशः केन कारणेन पठति ?

(ii) लेखकः कथमेतदनुभवति यत्पाठकाः कालस्य मूल्यं नावगणयन्ति ?

(iii) तथ्यस्यास्य कः संकेतः यत्पाठकानां कालः नोचितरूपे यापितः ?

(iv) पठनानन्तरं लेखकस्य काऽपेक्षा यत्पाठका एतत्कुर्युः ?

(v) अन्यमनस्कपठनम्प्रति लेखकस्य कथं प्रतिकूलं दृष्टिकोणमस्ति ?

(vi) कीदृशान् पाठकान् वाञ्छति लेखकः ?

**3.** अधस्तनगद्यांशस्य संक्षेपः मूलभागस्य तृतीयांश एव लेख्यः। निर्धारितशब्दसीम्नि लेखनेऽसाफल्ये अङ्कक्षतिरावश्यकी। संक्षेपणं तदर्थं पृथग्रूपेण प्रदत्त-प्रपत्रेष्वेव कार्यम्, अनन्तरञ्च सम्यग्रूपेण उत्तरपुस्तिकया सम्बद्धं करणीयम्। **60**

जलं पृथिव्याः धरातलीयक्षेत्रस्य सप्ततिप्रतिशतभागे सामान्येन पर्याप्तमात्रायां प्राप्यमाणः पदार्थः। सम्पूर्णविश्वस्य जलं 1·386 बिलियनात्मकमस्ति; यस्य सप्तनवतिप्रतिशतं, लवणयुतम्मानवोपयोगाय च नोपयुक्तम्। शेषं केवलं त्रिप्रतिशतमेवोपयोगि, परन्तस्यापि 68·5 प्रतिशतं जलं हिमाच्छादितं, हिमशीर्षेसु शाश्वतहिमरूपे च, अतश्च न मानवोपयोगाय। शुद्धजलस्य अनुमानतः त्रिंशत्प्रतिशतं भूमिगतम्, 0·9 प्रतिशतं नदीप्रपाततडागरूपे। अधिकांशतया वयं प्रतिदिनं

70 जलमापकयन्त्रमिते जले निर्भराः यन्नदीभिः, प्रपातैः तटाकैश्चोपलभ्यते, एतावन्मात्रमेव जलं भूमिगत-जलभण्डारैः प्रवहति। एषाऽऽपूर्तिः शताब्देभ्योऽनवरतमुपलभ्यते, परञ्जलस्याभियाचना विशेषेण अन्तिमकतिपयदशाब्देभ्यो गृहावश्यकताभ्यः, कृषिकारणेभ्यः औद्योगिकावश्यकताभ्य-श्चातिवेगेन वर्धते। 1940तमे वर्षे यदा विश्वजनसंख्या 2 बिलियनात्मकम् आसीत्, जलप्रयोगस्य वार्षिकम् आकलनं 1,000 क्यू.मी. इत्येतस्मात् मापात् न्यूनमासीत्; 2000 यावत् जनसंख्या 6,000 बिलियन्-अङ्कादधिका जाता, प्रतिमानवं जलस्याभियाचना च 6,000 जलमापकाङ्काद् वर्धिता, येन जलावाप्तिसंसाधनेषु अतीवभारः जातः, विशेषेण सघन-जनसंख्याप्रदेशेषु तेषु च स्थलेषु यत्र जलमतिन्यूनमासीत्। कृषिक्षेत्रं सप्ततिप्रतिशतं, औद्योगिकक्षेत्रं द्वाविंशतिप्रतिशतं, गृहक्षेत्रञ्च अष्टप्रतिशतं जलव्ययं करोति। शुद्धं जलं विश्वजनसंख्याया वेगेन संवर्धनात् शुद्धजलस्याभियाचनावर्धनाच्च दुष्प्राप्यं संसाधनमिव जायते। प्रतिवर्षं सम्पूर्णोपलब्धजलस्य अर्धमात्रमेवोपयोगे आयाति। 2050 वर्षं यावदेतत् चतुस्सप्ततिप्रतिशतपर्यन्तमेतद् भवितुं शक्यते। यदि सर्वत्र जना अमेरिकादेशवासिन इव जलव्ययं कुर्वन्तु, ये जलोपयोगविषये सर्वतोऽग्रे तदा जलोपयोगस्तरः नवतिप्रतिशतं यावद्भवेत्।

शुद्धजलस्योल्लेखनीयः पक्ष एषो यत्तस्य उपलब्धिः सम्पूर्णे विश्वेऽसमाना। अनेके देशाः जलसमृद्धाः अनेके च जलदरिद्राः, प्रतिवर्षं प्रतिजनोपलब्धिः यदि ग्रीन्लैण्डदेशे 10,767 मिलि. क्यू.मी. जलमापकाङ्कमस्ति, तदा कुवैतदेशे तन्मात्रदश क्यू.मी. यावदस्ति। भारते 1951तमे वर्षे प्रतिवर्षं प्रतिव्यक्तिजलोपलब्धिः

5,177 जलमापकाङ्कं यावदासीत्, 2001तमे वर्षे तन्यूनीभूय 1,820 जलमापकाङ्कं यावन्निपतिता, येन च भारतं जलदरिद्र-देशानां श्रेण्यामापातितम्। 2025तमे वर्षे प्रतिवर्षं प्रतिव्यक्ति जलव्ययः 1,340 जलमापकाङ्क-पर्यन्तं भविता।

विश्वस्यानेका बृहत्यो नद्यस्तासां सहायिकाश्च एकाधिक-देशेषु प्रवहन्ति, उदाहरणार्थं गंगा तस्याः सहायिकाश्च नेपाल-भारत-बांग्लादेशेषु प्रवहन्ति, सिन्धुनदी तस्याः सहायिकाश्च भारत-पाकिस्तानदेशयोः प्रवहन्ति। देन्यूब-नदी यत्र जर्मनीदेशात् उद्भवति, एषा अस्ट्रिया-स्लोवाकिया-हंगेरी-क्रोशिया-सर्बिया-रोमानिया-बल्गारिया-माल्देविया-यूक्रेनदेशेभ्यः प्रवहति। जाम्बेज़ी नदी जाम्बिया-अंगोला-नामीबिया-बोत्स्वाना-जिम्बाब्वे-मोज़ाम्बीकदेशेभ्यः प्रवहति। मिस्रदेशस्य जीवनधारा-नीलनद्याः उद्गमोऽष्टदेशेषु वर्तते – ते च सूडान-इथियोपिया-केन्या-रवाण्डा-बुरुन्डी-युगाण्डा-तंजानिया-जायरे-देशाः। यदैका नदी एकाधिकेभ्यो देशेभ्यः प्रवहति, तदा सर्वदैव तेषां देशानाम्मध्ये जलवितरणमधिकृत्य विवादाः समजायन्त। एतादृशा विवादा ई.पू. 3000 वर्षेभ्यः मध्य-एशिया-मध्ययूरोप-दक्षिण-मध्यपूर्वक्षेत्रेषु अनुदिनं जायन्ते। कृषि-उद्योग-गृहोपयोगेभ्यो जलस्यावश्यकता अनुदिनं वर्धते, तत्सम्बद्धविवादाः गम्भीरस्थिती उत्पादयन्ति, यदा कदा च हिंसकरूपवन्तोऽपि जायन्ते।

एकस्मिन्नपि देशे प्रवहमाननदीनां जलविभाजनं स्थानीय-क्षेत्रीयस्तरयोः संवेदनशीलम्। गौतमबुद्धेनापि (563-483 ई.पू.) शाक्यकोटियामध्ये रोहिणीनद्या जलविभाजनाय हस्तक्षेपः कृत आसीत्।

**4.** निम्नगद्यांशस्य संस्कृतभाषायामनुवादः करणीयः । 20

I remember my father starting his day at 4 a.m. by reading the namaz before dawn. After the namaz, he used to walk down to a small coconut grove we owned, about 4 miles from our home. He would return, with about a dozen coconuts tied together thrown over his shoulder, and only then would he have his breakfast. This remained his routine even when he was in his late sixties.

I have throughout my life tried to emulate my father in my own world of science and technology. I have endeavoured to understand the fundamental truths revealed to me by my father, and feel convinced that there exists a divine power that can lift one up from confusion, misery, melancholy and failure, and guide one to one's true place. And once an individual severs his emotional and physical bondage, he is on the road to freedom, happiness and peace of mind.

**5.** निम्नसंस्कृतगद्यांशस्य आंग्लभाषायामनुवादः क्रियताम् । 20

चिकित्सालयानामुदयः बहुप्राचीनकालाद् भूतः स्यात्, ईसाकालगणनातो बहुपूर्वम्, एतद् विचार्यतेऽस्मिन् विषये यच्चिकित्सालयानामुदयः यूनानदेशे मिस्रदेशे भारते चाभूत् । विश्वस्यानेकेषु देशेषु अधुना महत्सर्वरोगोपचारिणः

चिकित्सालयाः सन्ति, यत्र सर्वविधरोगोपचारस्य प्रावधानं वर्तते तत्र च सर्वविधप्रशिक्षणशोधसाधनानि प्राप्यन्ते। वर्तन्तेऽद्यत्वे महत्यो लघुसंस्थाः, यासामनेकाः रोगविशेषेभ्यः समर्पिताः अथवा महिलानां बालानाञ्च चिकित्सकीयापेक्षाः पूरयन्ति। इंग्लैण्डदेशे संयुक्तराज्य-अमेरिकादेशे च चिकित्सालयानां रोगोपचाराय राज्यानि नगरनिकाया वा सहयोगं यच्छन्ति। अनया पद्धत्या न केवलं कार्यबाधा अपवारिता वित्तीयकाठिन्यञ्च दूरीकृतम्, अपितु सम्पूर्णः समाजः व्यर्थक्लेशसहनादपि संरक्षितः, ऊर्जलाभस्य सदुपयोगोऽपि सम्भवोऽभवत्। सहैव अनेन विधिना एकस्याः प्राणहीनायाः, यान्त्रिक्याः आत्मविहीनाया दिनचर्यायाः कार्यकुशलतायाश्च ह्रासोन्मुखात् स्तरात् अपि निवृत्तिः लब्धुं शक्या या च ओजःपूर्णालोचनाया, अपव्ययस्य चानिरोधाद् वृद्धिमेति।

**6.** (क) अधोलिखितपदानां स्वरचितवाक्येषु प्रयोगं कुरुत 20

(i) केन

(ii) तव

(iii) माता

(iv) वयति

(v) रामस्य

(vi) भूतपूर्वः

(vii) परश्वः

(viii) आपणम्

(ix) पयः

(x) यतो हि

(ख) अधोलिखितवाक्यानि शुद्धीकुरुत 20

(i) रामो पठति।

(ii) किं भाषसि ?

(iii) सः कुत्र वससि ?

(iv) हिमालयेन गंगा प्रवहति।

(v) अहं किमपि नाकरोः।

(vi) मम भ्राता अस्वस्था।

(vii) त्वं कुत्र आसीत् ?

(viii) भारो बाधति।

(ix) भवान् नैतत् कुरु।

(x) स गृहे उपवसति।

---